एवं प्रमाणानि यथा,—

"मेषेऽङ्कतर्काष्टशरेषुभागा
जीवास्फुजिज्ज्ञारशनैश्चराणाम् ॥ १ ॥
वृषेऽष्टतर्काष्टशरानलांशाः
शुक्रज्ञजीवार्किकुजेशहद्दाः ॥ २ ॥
युग्मे षडङ्गेषुनगाङ्कभागाः
सौम्यास्फुजिज्जीवकुजार्किहद्दाः ॥ ३ ॥
कर्केऽद्रितर्काङ्गनगाब्धिभागाः
कुजास्फुजिज्ज्ञेज्यशनैश्चराणाम् ॥ ४ ॥
सिंहेऽङ्गभूताद्रिरसाङ्कभागा
देवेज्यशुक्रार्किबुधारहद्दाः ॥ ५ ॥
स्त्रियां नगाशाब्धिनगाक्षिभागाः
सौम्योशनोजीवकुजार्किहद्दाः ॥ ६ ॥
तुले रसाष्टाद्रिनगाक्षिभागाः
कार्लज्ञजीवास्फुजिदारनाथाः ॥ ७ ॥
कीटे नगाब्ध्यष्टशराङ्कभागा
भौमास्फुजिज्ज्ञेज्यशनैश्चराणाम् ॥ ८ ॥
चापे रवीष्वब्धिपञ्चवेदा
जीवास्फुजिज्ज्ञारशनैश्चराणाम् ॥ ९ ॥
मृगे नगाद्र्यष्टयुगश्रुतीनां
सौम्येज्यशुक्रार्किकुजेशहद्दाः ॥ १० ॥
कुम्भे नगाङ्काद्रिशरेषुभागा
ज्ञशुक्रजीवारशनैश्चराणाम् ॥ ११ ॥
मीनेऽर्कवेदानलनन्दपक्षाः
सितेज्यसौम्यारशनैश्चराणाम् ॥" १२ ॥

इति नीलकण्ठीयताजकम् ॥

हन, ल श्री गतौ । बधे । इति कविकल्पद्रुमः । (अदा०-पर०-सक०-अनिट् । ) ल. हन्ति । श्री, हन्ता । गणकृतमनित्यमिति न्यायात् शप क्षितौ हनतोत्यपि वररुचिः । तेन सर्व्वा एवाहनत् पृथक् इत्यादि साधुः । इति दुर्गादासः ॥

हन्, व्य, रुषोक्तिः । अनुनयः । इति मेदिनी ॥

हनः, पुं, हननकर्त्ता । यथा । हन्तर्वत्रघ्न । घत्वमभ्यासस्य उत्तरस्य त्वभ्यासाच्चेति कुत्वम् । घनाघनः । पाटेर्णिलुक् च दीर्घश्चाभ्यासस्य पाटूपटः । पक्षे हनः पटः । इति सिद्धान्तकौमुदी क्विपि हन् । तस्य प्रथमैकवचने हा ॥

हननं, क्ली, (हन + ल्युट् । ) मारणम् । यथा,—

"स्यात् प्राणवियोगफलकव्यापारो हननं
स्मृतम् ॥"

इति प्रायश्चित्तविवेकः ॥

(यथा, भागवते । ९ । ११ । २० ।

"नेदं यशो रघुपतेः सुरयाच्ञयात्त-
लीलातनोरधिकसाम्यविमुक्तधाम्नः ।
रक्षोवधो जलधिबन्धनमस्त्रपूगैः
किं तस्य शत्रुहनने कपयः सहायाः ॥")

पूरणम् । इत्यङ्ग्याखम् ॥

हनोलः, पुं, केतकी । इति रत्नमाला ॥ हलीनीऽपि पाठः ॥

हनुः, पुं, स्त्री, (हन्ति कठिनद्रव्यादिकमिति । हन + "शृस्पृस्निहीति ।" उणा० १ । ११ । इति उः । स च नित् । ) कपोलद्वयपरमुखभागः । चोयालि इति भाषा । इत्यमरः ॥ ताभ्यां कपोलाभ्यां परो मुखभागो हनुरुच्यते । यत्र जम्भाख्या दन्ता जायन्ते इति सुभूतिः । हन्ति कठोरमपि द्रव्यं हनु नाम्नोतिः उः । तत्परेति पाठे हनोः स्त्रीत्वम् । हनुः कपोलावयवे द्वयोरिति कश्चित् । तन्वादेर्व्वा इत्यूपि हनूश्च ॥ पुंस्यपीति स्वामी । पुंयोगे कर्णहनू नपुंसके श्मश्रु जानु च गुदश्चेति वररुचिः । इति भरतः ॥

हनुः, स्त्री, (हन्ति पुरुषमिति । हन + उः । हट्टविलासिनी । इत्यमरः ) रोगः । अस्त्रम् । मृत्युः । इति जटाधरः ॥

हनुमान्, [त्] पु, (हनुरस्त्यस्येति । हनु + मतुप् । ) वानरविशेषः । स तु अञ्जनागर्भे पवनौरसाज्जातः । रावणवधार्थश्रीरामदूतश्च । तत्पर्य्यायः । मनूमान् २ आञ्जनेयः ३ योगचरः ४ अनिली ५ हिड़िम्बारमणः ६ रामदूतः ७ अर्ज्जुनध्वजः ८ । इति त्रिकाण्डशेषः ॥ मरुतात्मजः ९ । इति जटाधरः ॥ * ॥ अथ हनूमत्कल्पः ।

देव्युवाच ।

"शैवानि गाणपत्यानि शाक्तानि वैष्णवानि च ।
साधनानि च सौराणि चान्यानि यानि कानि
च ।
श्रुतानि तानि देवेश ! त्वद्वक्त्राद्भिःसृतानि च ॥
किञ्चिदन्यत्तु देवानां साधनं यदि कथ्यताम् ।

शङ्कर उवाच ।

शृणु देवि ! प्रवक्ष्यामि सावधानावधारय ।
हनूमत्साधनं पुण्यं महापातकनाशनम् ॥
एतद्गुह्यतमं लोके शीघ्रसिद्धिकरं परम् ।
जयो यस्य प्रसादेन लोकत्रयजितो भवेत् ॥ * ॥
तत्साधनविधिं वक्ष्ये नृणां सिद्धिकरं द्रुतम् ॥
वियत् सलवकं हनूमते च तदनन्तरम् ।
रुद्रात्मकाय कवचं फड़िति द्वादशाक्षरः ॥
एतन्मन्त्रं समाख्यातं गोपनीयं प्रयत्नतः ।
तव स्नेहेन भक्त्या च दासोऽस्मि तव सुन्दरि ! ॥
एतन्मन्त्रं अर्ज्जुनाय प्रदत्तं हरिणा पुरा ।
जयेन साधनं कृत्वा जितं सर्व्वं चराचरम् ॥
नदीकूले विष्णुगेहे निर्ज्जने पर्व्वते वने ।
एकाग्रचित्तमाधाय साधयेत् साधनं महत् ॥"

ध्यानमाह ।

"महाशैलं समुत्पाट्य धावन्तं रावणं प्रति ।
तिष्ठ तिष्ठ रणे दुष्ट घोररावं समुत्सृजन् ॥
लाक्षारक्तारुणं रौद्रं कालान्तकयमोपमम् ।
ज्वलदग्निसमं नेत्रं सूर्य्यकोटिसमप्रभम् ॥
अङ्गदाद्यैर्महावीरैर्व्वेष्टितं रुद्ररूपिणम् ।
एवंरूपं हनूमन्तं ध्यात्वा यः प्रजपेन्मनुम् ॥
लक्षजपात् प्रसन्नः स्यात् सत्यं ते कथितं मया ।
ध्यानैकमात्रतः पुंसां सिद्धिरेव न संशयः ॥
प्रातः स्नात्वा नदीतीरे उपविश्य कुशासने ।
प्राणायामं षड़ङ्गञ्च मूलेन सकलं चरेत् ॥
पुष्पाञ्जल्यष्टकं दत्त्वा ध्यात्वा रामं ससीतकम् ।
ताम्रपात्रे ततः पद्ममष्टपत्रं सकेशरम् ॥
रक्तचन्दनघृष्टेन लिखेत्तस्य शलाकया ।
कर्णिकायां लिखेन्मन्त्रं तत्रावाह्य कपिं प्रभुम् ॥
कर्णिकायां हनूमन्तं ध्यात्वा पाद्यादिकं ततः ।
सुग्रीवं लक्ष्मणं चैव अङ्गदं नलनीलकम् ॥
जाम्बवन्तञ्च कुमुदं केशरिणं दले दले ।
पूर्व्वादिक्रमतो देवि ! पूजयेद्गन्धचन्दनैः ॥
पवनञ्चाञ्जनाञ्चैव पूजयेद्दक्षवामतः ।
दलाग्रेषु कपिभ्योऽपि पुष्पाञ्जल्यष्टकं ततः ॥
ध्यात्वा तु मन्त्रराजं वै लक्षं यावत्तु साधकः ।
लक्षान्तदिवसं प्राप्य कुर्य्याच्च पूजनं महत् ॥
एकाग्रचित्तमनसा तस्मिन् पवननन्दने ।
दिवारात्रौ जपं कुर्य्यात् यावत् सन्दर्शनं
भवेत् ॥
सुदृढं साधकं मत्वा निशीथे पवनात्मजः ।
सुप्रसन्नस्ततो भूत्वा प्रयाति साधकाग्रतः ॥
यथेप्सितं वरं दत्त्वा साधकाय कपिप्रभुः ।
वरं लब्ध्वा साधकेन्द्रो विहरेदात्मनः सुखैः ॥
एतद्धि साधनं पुण्यं देवानामपि दुर्लभम् ।
तव स्नेहात् समाख्यातं भक्तासि मयि पार्व्वति ॥"

इति गारुड़े हनूमत्साधनमिति तन्त्रसारः ॥ * ॥

"हनूमतोऽतिगुह्यन्तु लिख्यते वीरसाधनम् ।
ब्राह्मे मुहूर्त्ते उत्थाय कृतनित्यक्रियो द्विजः ॥
गत्वा नदीं ततः स्नात्वा तीर्थमावाह्य चाष्टधा ।
मूलमन्त्रं ततो जप्त्वा सिञ्चेदादित्यसंख्यया ॥"

ततो वाससी परिधाय गङ्गातीरे पर्व्वते वा उपविश्य ह्रां अङ्गुष्ठाभ्यां नमः इत्यादिना कराङ्गन्यासौ कुर्य्यात् । ततः प्राणायामः । अकारादिवर्णानुच्चार्य्य वामनासापुटेन वायुं पूरयेत् पञ्चवर्गानुच्चार्य्य वायुं स्तम्भयेत् । यकारादिवर्णानुच्चार्य्य दक्षिणनासापुटेन रेचयेत् । एवं वारत्रयं कृत्वा मन्त्रवर्णैरङ्गन्यासं कृत्वा ध्यायेत् ॥ * ॥

"ध्यायेद्रणे हनूमन्तं कपिकोटिसमन्वितम् ।
धावन्तं रावणं जेतुं दृष्ट्वा सत्वरमुत्थितम् ॥
लक्ष्मणञ्च महावीरं पतितं रणभूतले ।
गुरुञ्च क्रोधमुत्पाद्य ग्रहीत्वा गुरुपर्व्वतम् ॥
हाहाकारैः सदर्पैश्च कम्पयन्तं जगत्त्रयम् ।
आब्रह्माण्डं समाव्याप्य कृत्वा भीमं कलेवरम् ॥"

इति ध्यात्वा षट्सहस्रं जपेत् ॥

अस्य मन्त्रः ।

"स्वबीजं पूर्व्वमुच्चार्य्य पवनञ्च ततो वदेत् ।
नन्दनञ्च ततो देयं ङेऽवसानेऽनलप्रिया ॥
दशार्णोऽयं मनुः प्रोक्तो नराणां सुरपादपः ॥"

ह्रौं पवननन्दनाय स्वाहा । इतिमन्त्रः । सप्तमदिवसे दिवारात्रं व्याप्य जपेत् । ततो महाभयं दत्त्वा त्रिभागशेषासु निशासु नियतमागच्छति । साधको यदि मायां तरति तदेप्सितं वरं प्राप्नोति ।

"विद्यां वापि धनं वापि राज्यं वा शत्रुनिग्रहम् ।